**ऋन्नेभ्यो ङीप् (४।१।५)**

ऋकारान्तेभ्यो नकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीप् प्रत्ययो भवति ङकारः सामान्यग्रहणार्थः। कर्त्री। हर्त्री। दण्डिनी। छत्रिणी।

सिद्धान्त-कौमुदी --

ऋदन्तेभ्यो नान्तेभ्यस्च स्त्रियां ङीप्स्यात् । क्रोष्ट्री । क्रोष्ट्र्यौ । क्रोष्ट्र्यः । 'वधू'गौरीवत् । ठभ्रूः' श्रीवत् । हे सुभ्रूः । कथं तर्हि-'हा पितः क्वासि हे सुभ्रु' इति भट्टिः । प्रमाद एवायमिति बहवः । खलपूः पुंवत् । पुनर्भूः । 'दृन्करे'ति यणा उवङो बाधना'न्नेयङुव'ङिति निषेधो न । हे पुनर्भु ! । पुनर्भ्वम् । पुनर्भ्वौ । पुनर्भ्वः । पुनर्भ्वा ।

**उगितश् च (४।१।६)**

उगिति यत्र सम्भवति यथाकथंचित् तदुगिच्छाब्दरूपं, तदन्तात् स्त्रियां ङीप् प्रत्ययो भवति। भवती। अतिभवती। पचन्ती। यजन्ती। धातोरुगितः प्रतिषेधो वक्तव्यः। उखास्रत्। पर्णध्वत् ब्राह्मणी। अञ्चतेश्च उपसङ्ख्यानम्। प्राची। प्रतीची। उदीची।

**वनो र च (४।१।७)**

वन्नन्तात् प्रातिपदिकात् स्त्रियां ङीप् प्रत्ययो भवति, रेफश्चान्तादेशः। धीवरी। पीवरी। शर्वरी। परलोकदृश्वरी। ऋन्नेभ्यो ङीप् ४।१।५ इत्येव ङीपि सिद्धे तत्सन्नियोगेन रेफविधानार्थं वचनम्। वनो न हशः। प्राप्तौ ङीब्रौ उभावपि प्रतिषिध्येते। सहयुध्वा ब्राह्मणी।